# प्रत्युपकारः

आसीदेकं सुन्दरं वनम् । वने अस्मिन् सर्वे पशुपक्षिणः आनन्देन सामञ्जसेन च निवसन्ति स्म । वनवृक्षाणां फलादिकं खादन्ति स्म, सुखेन जीवन्ति स्म । तस्य वनस्य परिसरः अतीव रम्यः आसीत् । नद्याः तीरे बहवः वृक्षाः शोभन्ते स्म । तत्र एकस्मिन् शमीवृक्षे बहवः कपोताः वसन्ति स्म । तस्य वृक्षस्य अधः पिपीलिकानां एकः वल्मीकः आसीत् । कपोतानां पिपीलिकानां च प्रातिवेशिणः इव सुदृढः संबन्धः आसीत् । एवं मैत्रीपूर्ण वातावरणे आनन्देन जीवितं प्रचलति स्म ।

परं हा हन्त, वने दुष्टचक्रं प्रारब्धम् । व्याधाः वनमागत्य प्राणिनां हिंसामारब्धवन्तः । सर्वे भयभीताः अभवन् । ततः कस्यचित् हननं निश्चितमेव । एकस्मिन् दिने एकः व्याधः नदीतीरं आगतः । डयन्तं एकं कपोतं दृष्ट्वा तेन शरः सिद्धः कृतः । परं तस्मिन्नेव क्षणे एका पिपीलिका व्याधं दष्टवती । व्याधस्य शरः अन्यत्र एव गतः । एवं पिपीलिकायाः कारणेन कपोतस्य प्राणाः रक्षितः । पिपीलिकायाः उपकारं स्मरन् कपोतः उण्डयनं कृतवान् ।

एवमेव दिनानि अतीतानि । वने पुनः एकवारं आनन्दः समृद्धिश्च आगतः । वर्षाकालः समागतः । मयूराः नृत्यन्ति स्म । पक्षिणः डयन्ते स्म । परं वनस्य एतत् सुन्दरं दृश्यं अधिककालं न अतिष्टत् । पुनः दुष्टचक्रं आरब्धम् । नद्याः जलपूर्णः आगतः । पिपीलिकानां वल्मीकस्य जलसमाधिः लब्धः । पिपीलिकाः मृतः वृक्षे कपोतः उपविष्टः आसीत् । सः सहसा अधः दृष्टवान् । नद्याः प्रवाहेन पिपीलिका वहन्ति आसीत् । अनुक्षणं तेन वृक्षस्य कानिचन पर्णानि नद्यां क्षिप्तानि । पिपीलिका एकस्य पर्णस्य उपरि आरूढवती । एवं तस्याः प्राणाः रक्षिताः ।

अतः एव उच्यते **‘आपदि मित्रपरीक्षा’** ।

* * * * *